No. of Page : 4 नामांक ROLL NO. J - 106
No. of Q. : 20

# अर्द्ध वार्षिक परीक्षा, 2019-20

## कक्षा - 9

## विषय - संस्कृत

**समय : 3¼ सपाद होरात्रयम्** **पूर्णांक : 70**

नोट :- 1. सभी प्रश्न करने अनिवार्य है।

2. प्रश्नों के अंक उनके सामने अंकित हैं।

1. अधोलिखित-गद्यांशयो: कस्यचित एकस्य हिन्दी भाषायाम् अनुवादं लिखत- 5

(अ) अद्य प्रदूषणाद् निवाराणार्थं सर्वकारेण महान्तं प्रयासा: क्रियन्ते। तेषु प्रयासेषु वयमपि सहभागिन: भवाम:। अधिकाधिक वृक्षारोपणं तेषां संरक्षणं च कुर्म:। सर्वत्र स्वच्छतां च पालयाम:। जीवमात्रस्य संरक्षणं कुर्म:। सर्वे वयं पर्यावरणस्य संरक्षणाय प्रयत्नं करिष्याम: तर्हि विश्व: सुखी-सम्पन्नश्च भविष्यति।

**अथवा**

(ब) जनयो: जनानां वा मध्ये विचाराणां भावनानां सूचनानां वा विनिमय: संचार: कथ्यते। विचाराणां भावनानां सूचनानां वा परस्परमादानप्रदानाय यत् साधनं प्रयुज्यते तत् सञ्चारसाधनं भवति। मानवसभ्यताया: प्रारम्भकाले यदा भाषा विकसिता नासीत् तदानीं भावप्रेषणाय संकेतानां ध्वनिचिह्नानां वा प्रयोगो भवति स्म।

2. अधोलिखित पाठ्यपुस्तकात् पठितपद्यांशस्य सप्रसङ्गं हिन्दीभाषायां - 5

(अ) अनुवादं कुरुत

उद्योगे नास्ति दारिद्र्यं
जपतो नास्ति पातकम्।
मौने च कलहो नास्ति
नास्ति जागरिते भयम्॥

(ब) शान्तिमयी यस्या वर-वाणी,
असुर-मर्दिनी या शर्वाणी,
श्री-स्वरूपिणी या कल्याणी
पुण्यमयी मम भारतमाता

P.T.O.

3. अधोलिखितयोः पद्ययोः एकस्य संस्कृतभाषायां व्याख्यां कुरुत- 5

(अ) परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगेयुगे॥

(ब) उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥

4. अधोलिखितेषु प्रश्नेषु केषाञ्चन पञ्च प्रश्नानामुत्तराणि संस्कृत माध्यमेन लिखत 1×5=5

(क) शरीरावयवाः केन दृढाः भवन्ति?

(ख) निर्गन्धाः किंशुकाः इव के न शोभन्ते?

(ग) महाकविदण्डिनः रचना का वर्तते?

(घ) शशगजराज कथा कस्माद् उद्धृता?

(ङ) विश्वधर्ममहासभा कुत्र आयोजिता?

(च) परिणामदर्शी कः आसीत्?

(छ) वेदाः कति सन्ति?

(ज) योगस्य अष्टमः अंगः कः?

5. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत- 1×3=3

(i) शीघ्रमेव <u>साम्प्रदायिकतायाः</u> विनाशः भविष्यति।

(ii) सः <u>रामकृष्णस्य</u> उक्तिं सिद्धां कृतवान्।

(iii) <u>विपत्तौ</u> शत्रुणां सार्धमपि मित्रता कार्या।

6. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। घटनाक्रमानुसारं संयोज्य पुनः लिखत-4

(i) तदैव एका भक्षिका नृपस्य नासिकायाम् उपविशत्।

(ii) तेन नृपस्य नासिका एव छिन्ना अभवत्।

(iii) वानरः व्यजनेन तम् अवीजयत्।

(iv) अन्ते सः भक्षिकां हन्तुं खड्गेन प्रहारम् अकरोत्।

(v) एकदा नृपः सुप्तः आसीत्।

(vi) पुरा एकस्य नृपस्य एकः प्रियः वानरः आसीत्।

7. अधोलिखितं गद्यांशं पठित्वा एतदाधारितं प्रश्नानां उत्तराणि यथानिर्देश लिखत-1×8=8

सतां संगतिः सत्संगतिः कथ्यते। सतां संगत्या जनः विनम्रः सज्जनः शिष्टश्च भवति। मनुष्यः यादृशैः जनैः संगतिं करोति तादृश एव संपद्यते। सत्संगत्या मनुष्यः

उन्नतिपथं प्रयाति। सुगत्याः प्रबलः प्रभावो भवति। बालकस्य मस्तिष्कं अपरिपक्वं भवति। सः यादृशैः बालकैः सह वसति, तादृश एव जायते। असज्जनानां संगत्या वहूनि कष्टानि जायते।

(i) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(ii) सतां सङ्गतिः किं कथ्यते?

(iii) सत्सङ्गत्या जनः कीदृशः भवति?

(iv) मनुष्यः कथं उन्नतिपथं प्रयाति?

(v) असज्जनानां सङ्गत्या का हानिः?

(vi) कस्य मस्तिष्कं अपरिपक्वं भवति?

(vii) 'सज्जनः' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(viii) उपर्युक्त गद्यांशस्य संक्षिप्तीकरण कुरूत।

8. आत्मनः नवम्याः कक्षायाः राकेशः इति मत्वा विद्यालयस्य शुल्कमुक्त्यर्थं स्वस्य प्रधानाचार्याय एकं प्रार्थनापत्रं लिखत। 5

9. अधोलिखित पदानां सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत- ½×4=2

(i) गायकः (ii) यद्यपि

(iii) परोपकारः (iv) परीक्षा

10. अधोलिखित पदयोः सन्धिं कृत्वा सन्धेः नामापि लिखत- 1×2=2

(i) महा+ऋषि (ii) सदा+एव

11. अधोलिखित पदेषु समस्तपदानां विग्रहं कृत्वा समासस्य नामापि लिखत- 1×3=3

(i) यथाशक्ति (ii) राजपुरुषः

(iii) पितरौ

12. अधोलिखित रेखाङ्कित पदेषु विभक्तिं तत् कारणं च लिखत- 1×3=3

(i) हरये रोचते भक्तिः।

(ii) ग्रामं परितः क्षेत्राणि सन्ति।

(iii) शिक्षकः छात्रैः सह गच्छति।

13. अधोलिखित क्रियापदयोः धातु-पुरुष-लकार-वचनानां निर्देशनं कुरुत- 1×2=2

(i) भवामः (ii) गच्छतु

14. अधोलिखितपदयोः प्रकृतिं प्रत्ययं च पृथक् कृत्वा लिखत- 1×2=2

(i) कर्तुम् (ii) संभूय

15. अधोलिखितपदयोः प्रकृति-प्रत्यय संयोजनं कृत्वा लिखत- 1×2=2

(i) रक्ष्+क्त (ii) दश्+क्त्वा

16. अधोलिखित शब्दानां निर्देशानुसारं रूपं लिखत- 1×2=2

(i) 'नदी' (ईकारान्तं स्त्री) शब्द तृतीया विभक्ति बहुवचनम्।

(ii) 'युष्मद्' (दकारान्तम् सर्वनाम) शब्द सप्तमी विभक्ति द्विवचनम्।

17. अधोलिखितपदयोः प्रयुक्तोपसर्गः मूलपदञ्च पृथक-पृथक लिखत- 1×2=2

(i) प्रक्षालयति (ii) संचरति

18. दन्तौष्ठ उच्चारणस्थानं कस्य वर्णस्य अस्ति। 1

19. प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत। 2×2=4

20. अधोलिखितेषु वाक्येषु केषाञ्चन पञ्च वाक्यानि हिन्दीभाषायां संस्कृतभाषायाम् अनुवादः कुरूत। 1×5=5

(i) तुम सब पढ़ते हो।

(ii) धर्म पाप से बचाता है।

(iii) गाँव के बाहर सरोवर है।

(iv) कवियों में कालिदास श्रेष्ठ है।

(v) योग से शरीर स्वस्थ होता है।

(vi) भारत पुनः विश्वगुरू बनेगा।

(vii) सीता गीत गाती है।

(viii) वह खेलने गया था।

❖❖❖